International Journal of Research in Social Sciences
Vol. 13 Issue 08, August 2023,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# वैयाकरणमते वृत्तिविचारः

**प्रो. धनीन्द्रकुमारझाः**
**आचार्यः, व्याकरणविभागः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः,**
**लखनऊपरिसरः**

शब्दस्यानितरसाधारणो महिमेत्यत्र न कस्यचनापि विपश्चितो वैमत्यम्। प्रवृत्तिनिवृत्त्यादिव्यवहारे शब्दस्य हेतुत्वं लोके दृग्गोचरीभवति। अतः शब्दस्य प्रमाजनकत्वं सर्वजनानुभववेद्यम्। घटमानयेत्युच्यमाने घट एवानीयते न तु पटः अतः घटशब्दे घटार्थनिरूपिता काचित् विलक्षणा शक्तिरित्यवश्यमभ्युपेयमन्यथा कस्माच्चनापि शब्दात् कस्यचिदप्यर्थस्य भानं प्रसज्येत। तस्मात् शाब्दबोधं प्रति वृत्तिज्ञानं हेतुः इति वक्तव्यम्, इत्थं वृत्तिज्ञानाभाववतः पुरुषस्य शाब्दबोधवारणेऽपि सकलशाब्दबोधव्यक्तीनां सङ्ग्रहो न स्यात् तदर्थं शाब्दबुद्धित्वावच्छिन्नं वृत्तिज्ञानं हेतुरिति वाच्यम्।

परमेतावदुच्यमाने घटविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति पटनिरूपितवृत्ति-ज्ञानस्यापि हेतुत्वमापद्यते तन्निरासाय तद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तन्निरूपितवृत्तिज्ञानस्य कारणत्वमवश्यमङ्गीकार्यम् एवं स्वीक्रियमाणे च यद्यपि घटार्थनिरूपितवृत्तिज्ञानात् पटविषयकशाब्दबोधो नोदेति वृत्तिज्ञानजन्यत्वस्य प्रवेशात् आकाशादौ वृत्तिजन्योपरिस्थेरभावेन अतिव्याप्तिः न भवति तथापि घटप्रकारक-घटत्वविशेष्यकवृत्तिज्ञानादपि घटत्वप्रकारकघटविशेष्यकशाब्दबोधः दुर्निवारः अतः तद् धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः इति कार्यकारणभावः स्वीकार्यः। एवञ्च प्रकारीभूतधर्मस्यैव अवच्छेदकत्वस्वीकारेण घटत्वप्रकारघटविशेष्यकशाब्दबुद्धित्वावच्छिन्नस्य घटत्वावच्छिन्नविषयक शाब्दबुद्धित्वावच्छिन्नतया घटत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति घटत्वावच्छिन्नो घटो घटपदवाच्य एतादृशस्य घटत्वावच्छिन्ननिरूपितवृत्तिज्ञानस्यैव कारणत्वात् घटावच्छिन्नघटत्वं घटपदवाच्यम् इत्याकारकस्य घटावच्छिन्नघटत्वनिरूपितवृत्तिज्ञानस्य हेतुत्वविरहेण निरुक्ता दोषाः न भवन्ति।

वृत्तिज्ञानवतोपि जनस्य उपेक्षादिना विस्मृतवृत्तिकस्य अनुत्पन्नवृत्तिज्ञानस्य वा जनस्य शाब्दबोधवारणाय वृत्तिविशिष्टज्ञानस्यैव कारणत्वं वक्तव्यम् वैशिष्ट्यं च स्वविषयकोद् बुद्धसंस्कारसमानाधिकरण्य-स्वाश्रयपदविषयकत्व इत्युभयसम्बन्धेनेति बोध्यम्। एतत्सर्वं निभाल्यैव श्रीमान् नागेशभट्ट आह-

**"तत्रागृहीतवृत्तिकस्य शाब्दबोधादर्शनात् न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यत इति समर्थसूत्रभाष्याच्च तद्धर्मावच्छिन्नविषयकशाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्न निरूपित-वृत्तिविशिष्टज्ञानं हेतुः"**[i] इति।

सा च वृत्तिः केति जिज्ञासायां प्रतिपाद्यते सा च शक्तिलक्षणाव्यञ्जनान्यतमरूपेति। यथाक्रमं शक्तिमिह किञ्चित् निरूपयामः। प्राचीनास्तार्किकाः ईश्वरेच्छा शक्तिरिति वदन्ति। तन्मते आधुनिकसङ्केतेऽपि शक्तिः विद्यत एव तत्रापि 'एकादशेऽहनि पिता नाम कुर्यात्' इति ईश्वरेच्छयाः विद्यमानत्वात्। ईश्वरेच्छा

**International Journal of Research in Social Sciences**
**Vol. 13 Issue 08, August 2023,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

अस्मात्पदादयमर्थो बोद्धव्य इत्यत्र पदप्रकारिका अर्थविशेष्यिका, इदं पदमिममर्थं बोधयित्वत्यत्र च अर्थप्रकारिका पदविशेष्यिका बोध्या। नव्यास्तु इच्छामात्रस्य शक्तिरित्याहुः।

परं मतमिदं शाब्दिका न सहन्ते तथाहि ईश्वरेच्छायाः शक्तित्वं तदैव स्यात् यदा तस्याः सम्बन्धत्वं क्लृप्तं भवेत्। लोके सम्बन्धत्वं चाधाराधेयभावनियामकस्यैव विलोक्यते। शास्त्रज्ञानां चात्रैव सम्मतिः। प्रकृते अयमर्थः इच्छावान् अयं शब्दो वा इच्छावान् इति व्यवहाराभावेन इच्छात्याः सम्बन्धत्वकल्पनं खपुष्पायितमेव। अत्र चेत्थमनुमानप्रयोगो वेदितव्यः ईश्वरेच्छा शक्तिः न सम्बन्धः आश्रयताया अप्रयोजकत्वात् तादात्म्यवत्। एतत्सर्वं मनसि निधायैवाह श्रीमान् नागेशभट्टः-

**"इच्छायाः सम्बन्धिनोराश्रयतानियामकत्वाभावेन सम्बन्धत्वासम्भवात्। सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः इत्यभियुक्तव्यवहारात्। यथा घटवद् भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्च नात्र तथा घटशब्दः इच्छावान्, तदर्थो वा इच्छावानिति व्यवहारः"**[ii] इति।

अतः शक्तिः इच्छातिरिक्त एव पदार्थः स्वीकार्यः। अत्र मीमांसकाः ईश्वरस्याभावात् ईश्वरेच्छा न शक्तिरपितु यस्य कस्यचन सङ्केत एव शक्तिपदार्थः। अत एव व देवदत्तादिपदैः अपि शाब्दबोधो लोके दृश्यते। अत्र 'द्वादशेह्नि पिता नाम कुर्यात्' इति श्रुत्यनुरोधेन तत्रापि ईश्वरेच्छायाः सत्त्वात् ईश्वरेच्छैव शक्तिरिति तु न शङ्क्यम् तथाङ्गीकारे अपभ्रंशानामपि शक्तत्वापत्तिः स्यात्। परमयं सङ्केतः स्वरूपेण हेतुः भवितुं नार्हति तथा सति अगृहीतशक्तिकादपि अर्थबोधप्रसङ्गसत्त्वात्। तर्हि सामान्यतो ज्ञातः सङ्केतो हेतुरस्तु इति चेत्तदपि न युक्तं प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात् अतो मीमांसकानामपि मतं न साम्प्रतम्।

तस्माद् शक्तिविषये शाब्दिकैः प्रोच्यते-

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**[iii] इति

अत्र इन्द्रियपदेन ज्ञानेन्द्रियं स्वीक्रियते अत एव कौण्डभट्टः चक्षुरादीनामित्यर्थं व्याकरोत्। अस्याश्च अनादित्वकथनेन न विद्यते आदिर्यस्याः इति व्युत्पत्त्या अस्याः स्वाभाविकत्वं सिद्ध्यतीति मन्तव्यम्। यथा चक्षुरादीनां रूपादिग्रहणे पुरुषप्रयत्नापेक्षा न भवति प्रयत्नानपेक्षतयैव तत्र ग्राहकत्वं, न हि प्रयत्नशतकेन च रूपे रसनिवेशः कर्तुं शक्यः तथैव घटशब्दस्य घटार्थबोधने बोधजनकतारूपा अनादिशक्तिरस्तीति भावः। अमुमेवार्थं कौण्डभट्टः एवं प्रत्यपीपदत्।

**"इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिषु यथाऽनादियोग्यता तदीय चाक्षुषादिकारणता तथा शब्दानामप्यर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिरित्यर्थः"**[iv]

शक्तिरेव वैयाकरणैः वृत्तिरित्युच्यते। भाष्यकारेण "**हलोनन्तराः संयोगः**"[v] इति सूत्रे भाष्ये प्रतिपादितं यत्-

ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**"ग्रामशब्दो हि बह्वर्थः, अस्त्येव शालासमुदाये वर्तते, तद्यथा ग्रामो दग्ध इति, तद्यथा सारण्यके ससीमके सस्थण्डिले वर्तते तमभिसमीक्ष्यैतत् युज्यते अनन्तरौ इमौ ग्रामौ"**[vi]

इति, अत्र हि वर्तत इत्यत्र लडर्थस्य विवक्षाभावेन धात्वर्थमात्रं बोधयितुमिष्टम्, अत एव पृथक् असधातुः चरितार्थतां याति। एतादृशव्याख्यानेन च वृत्तेः सत्ता स्पष्टी भवति। इयं च वृत्तिः पदनिष्ठा। मतमिदं प्राचीनवैयाकरणानुसारम्।

**नागेशभट्टमतम्**

भट्टनागेशस्तु ईश्वरेच्छायाः सम्बन्धत्वं खण्डयित्वा वाच्यवाचकभावरूपां शक्तिमङ्गीकरोति। तथा चोक्तम्-

**"तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया। तद् ग्राहकश्चेतरेतराध्यासमूलकं तादात्म्यम्। तदेव सम्बन्धः"**[vii]

अत्र च वाच्यत्वं वाचकत्वं च नैव बोधविषयत्वरूपम् न वा बोधजनकत्वरूपम् तथा सति नैयायिकपक्षोक्तस्य दोषस्य दुरुद्धरत्वात्, अतः अखण्डोपाधिरूपं पदार्थान्तरमेव वाच्यवाचकभावरूपमिति मन्तव्यम्। अस्य च शब्दार्थोभयवृत्तित्वेन सम्बन्धत्वमपि सूपपन्नं भवति।

इतरेतराध्यासमूलकः इत्यस्य च इतरेतराध्यासो मूलं ज्ञापकं यस्य सः इति व्युत्पत्तिः। यथा लोहितस्य स्फटिकस्य च तादात्म्यमध्यासमूलकं भवति तद्वदेव पदपदार्थयोरपि 'अयं घटः, अयं पटः इत्याद्याकारकं तादात्म्यमध्यासमूलकमेव न वास्तविकम्। अत्रैवमनुमानप्रयोगः- शब्दार्थौ परस्परतादात्म्यवन्तौ इतरेतराध्यासवत्त्वात् इति।

अत्र हि यत्र यत्र इतरेतराध्यासः तत्र तत्र तादात्म्यं यथा नीलो घटः इत्यादिप्रत्यक्षम् इत्यन्वयव्याप्तिः बोध्या। व्यतिरेकव्याप्तिस्त्वेवमत्र बोध्यम्- यत्र न तादात्म्यं न तत्राध्यासः यथा घटादेः।

इत्थं वैयाकरणमते वाच्यवाचकरूपाखण्डपदार्थः शक्तिः तच्च पदपदार्थयोः सम्बन्धः तद्ग्राहकश्च इतरेतराध्यासमूलकं तादात्म्यम्। तादात्म्यं नाम तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्, वास्तविको भेदः आरोपितश्चाभेदः अत एव अग्निशब्दोच्चारणे न दाहः मधुशब्दोच्चारणे च न मधुरत्वप्रतीतिः।

अत्र च नागेशभट्टः बौद्धमेवार्थं स्वीकरोति अत एव बाह्यार्थशून्यानां वन्ध्यापुत्रादि-शब्दानामर्थवत्त्वात् प्रातिपदिकत्वं सिद्ध्यति।

**"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः।।"**[viii]

इत्यादयश्च प्रयोगाः बौद्धार्थस्वीकारादेव सूपपद्यन्ते। बौद्धार्थत्वादेव चात्र प्रातिपदिकत्वम्। पदं चाप्यत्र बौद्धं स्फोटात्मकमेव स्वीकार्यम्।

प्रकृतेऽर्थे दर्शनान्तरीयप्रमाणं निदर्शयन्नाह नागेशः-

**International Journal of Research in Social Sciences**
**Vol. 13 Issue 08, August 2023,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**"अत एव शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः इति विकल्पसूत्रं सङ्गच्छते। शब्दज्ञान-मात्रेणानुपाती बुद्धावनुपतनशीलो वस्तुशून्यो बाह्यार्थरहितः विशेषेण कल्प्यत इति विकल्पः, बुद्धिपरिकल्पित इति तदर्थः"**[ix]।

अस्य शब्दजन्यज्ञानानन्तरं वस्तुतत्त्वमनपेक्ष्य बुद्धावनुपतनशीलोऽध्यवसायो विकल्प इति भावः। बहुषु स्थलेषु भेदे अभेदारोपः अभेदे भेदारोपः यथा पुरुषस्य चैतन्यमित्यत्र अभेदे भेदारोपो दृष्टः। अयो दहतीत्यादौ च भेदे अभेदारोपो विलोक्यते।

शब्दार्थयोस्तादात्म्यम्

शब्दार्थयोश्च तादात्म्यं वैयाकरणैः स्वीक्रियते। तादात्म्यं नाम तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। तादात्म्यादेव श्लोकमशृणोत् अथार्थं श्रृणोतीति व्यवहारो लोके दृश्यते। अयं च व्वहारः शब्दार्थयोः अध्यासमन्तरा नैवोपपद्यते। अध्यासादेव च शब्दस्य श्रावणप्रत्यक्षविषयतावच्छेदकधर्मवत्त्वमर्थे प्रतीयते।

"**अदेङ् गुणः**" (अष्टाध्यायी 1/1/2)

"**वृद्धिरादैच्**" (अष्टाध्यायी 1/1/1)

इत्यादयः सामानाधिकरण्येन प्रयोगाः अपि शब्दार्थयोः तादात्म्याङ्गीकारादेव सूपपद्यन्ते। आह च नागेशः-

**"ओमित्येकाक्षरं ब्रह्म, रामेति द्वयक्षरं नाम मानभङ्गः पिनाकिनः। वृद्धिरादैच् इति शक्तिग्राहकश्रुतिस्मृतिविषये सामानाधिकरण्येन प्रयोगश्च। तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम्। अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः"**[x] इति।

भेदस्य वास्तविकत्वादेव वह्निशब्दोच्चारणे दाहापत्तिर्न भवति। मधुशब्दोच्चारणे च मुखे माधुर्यरसास्वादापत्तिर्न जायते।

**अपभ्रंशेष्वपि शक्तिः**

अपभ्रंशेषु शक्तिरस्ति न वेत्यत्र विवदन्ते दार्शनिकाः। तार्किका अपभ्रंशेषु शक्तिं नाङ्गीकुर्वते। असाधुशब्दैः साधुशब्दस्मरणपूर्वकमर्थबोध इति तेषामाशयः। व्युत्पन्नानां शब्दानामसाधुशब्देन साधुशब्दस्मरणद्वारार्थबोधः, अव्युत्पन्नानां तु शक्तेरभावेऽपि असाधुशब्दे शक्तिरस्तीति भ्रमाद् बोधे जायत इति तेषामाशयः।

परमिदं वैयाकरणा न स्वीकुर्वन्ति लोके साधुशब्दस्मरणं विनापि बोधानुभवात् साधुशब्दस्मरणेनैव बोध इति व्याहतं वचः। घड़ा, गगरी प्रभृतिशब्दश्रवणसमकालमेव स्मरणबोधकशिरश्चालनमन्तरापि बोधोऽनुभूयते, अनुभवश्च सर्वप्रमाणशिरोमणिभूतः। एतत्सर्वमालोच्यैव निगदितं श्रीमता नागेशेन-

**"यत्तु तार्किकाः असाधुशब्देन साधुस्मरणद्वारा अर्थबोध इत्याहुः। तन्न। साधुस्मरणं विनापि बोधानुभवात्। तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च।**

**न च शक्तिभ्रमाद् बोधः असाधुशब्देष्विति वाच्यम्।**

**निस्सन्देहप्रत्ययस्य बाधकं विना भ्रमत्वायोगात्**"।[xi]

इत्थं प्रबलैः युक्तिविशेषैः समानायामर्थावगतौ इत्यादिभाष्यप्रामाण्याच्च साधाविव असाधुशब्देष्वपि अवश्यमेव शक्तिरभ्युपेया।

इत्थं च बोधजनकतारूपा शक्तिः वाच्यवाचकभावापरपर्याया वा शक्तिः, सा च साधुष्विव अपभ्रंशेषु अपीति वैयाकरणानां सिद्धान्तः।

१. वै.सि.ल.मञ्जूषा, शक्तिनिरूपणम्
२. परमलघुमञ्जूषा-शक्तिविचारः
३. वै.भू.सा. शक्तिनिर्णयः 37
४. वै.भू.सा. शक्तिनिर्णयप्रकरणम्
५. अष्टाध्यायी 1/1/7
६. संयोगसूत्रे भाष्ये
७. परमलघुमञ्जूषा शक्तिविचारः
८. परमलघुमञ्जूषा, शक्तिनिरूपणम्
९. परमलघुमञ्जूषा, शक्तिविचारः
१०. परमलघुमंजूषा, शक्तिविचारः
११. परमलघुमञ्जूषा, शक्तिविचारः